प्रा० वि०। एतद्विषये एव। द्रोण्यामायसयुक्तायां कूले प्रावर्त्तके तथा। ग्रामप्रपाजलञ्चैव पीत्वापत्सु न दुष्यतीति लघुहारीतः। तदपि भूमिगतं कृत्वैव पेयं पूर्ववचनैकवाक्यत्वात्। "प्रावर्त्तके सेचके कूले अज्ञाते" प्रा० वि०। "कूपे विण्मूत्रसंसृष्टे पीत्वा तोयं द्विजोत्तमः। त्रिरात्रेण विशुध्येत" अङ्गिराः। "जलाशये तथान्येषु स्थावरेषु महीतले। कूपवत् कथिता शुद्धिः महत्सु च न दूषणमिति" विष्णुः। "महत्स्वप्यशुचिशङ्कया तीर्थसमीपतोयग्रहणवर्ज्जनमिति" प्रा० वि०। यथोक्तं देवलेन। "तत्राक्षोभ्यतडागानि नदीर्वापीः सरांसि च कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेदिति"। "हतपञ्चनखात् कूपादत्यन्तोपहताच्चोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेदित्यादि" विष्णुः "अत्यन्तोपहतात् अमेध्यादिनेति" प्रा० वि०। "यस्तु कूपात् पिबेत् तोयं ब्राह्मणः शवदूषितात् उपवासत्रयं कृत्वेत्यादि" लघुहा०। "क्लिन्नो भिन्नः शवश्चैव कूपस्थो यदि दृश्यते। पयः पीत्वा त्रिरात्रेण इत्यादि" देवलः। "पीतशेषं पिबेत् विप्रैर्विप्रः स्यादन्यथा पशुरिति भवि० पु०। "श्लेष्मोपानहविण्मूत्रं स्त्रीरजो मद्यमेव च। एभिः संदूषिते कूपे तोयं पीत्वा कथं विधिः। एकं द्व्यहं त्र्यहञ्चैव द्विजातीनां विशोधनमिति" अत्रिः। अत्रापवादमाह स एव "गोदोहने चर्म्मपुटे च तोयं यन्त्राकरे कारुकशिल्पिहस्ते। स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि। प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे। आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विकल्पनीयाः। शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्। चर्म्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलमिति"। प्रागुक्तवचनजातैः चर्म्मभाण्डस्थितयन्त्रोद्धृतयोरपेयत्वेन निषेधे प्राप्ते चर्म्मभाण्डैरुद्धृतं यन्त्रोद्धृतञ्च सन्ततधारयोद्धृतञ्च एतत्त्रयं यदि महीगतं गोतृप्तिकरं प्रकृतिस्थमविकृतं च तदा शुचीत्यनेन प्रतिप्रसूतम् महत्सु च न दुष्यतीत्यनेन महत्त्वस्यापेक्षाकृतत्वेन अव्यावर्त्तकतया गोतृप्तिकरत्वेन विशेषणात् तथाभूतं महत्त्वमेव प्रकृते विवक्षितम्। तदपि जलान्तराभावे शुद्धमित्यवधेयं प्रागुक्तवचने आपद्गतस्यैव भूमिगतं कृत्वा तत उद्धृत्य पानविधानेन तदेकवाक्यत्वात् तथैवेह ज्ञेयम्। एतच्च स्वभावतः पेयजलस्यैव—चर्म्मभाण्डादिस्थितिरूपदोषप्रतिप्रसवार्थम् न तु अपेयम्लेच्छादिखानिततोयस्यापि पेयताविधानार्थं तथात्वे वाक्यभेदापत्तेः न च हिरण्योदकस्पर्शस्य अन्नस्येव सामान्यशास्त्रनिषिद्धापेयजलस्य शुद्ध्यर्थतापरं स्वभावतः पेयस्यैव चर्म्मभाण्डादिगतत्वेन दोषपरिहारार्थतापरतयैव सर्व्वसामञ्जस्ये विधिद्वयकल्पनायाः अन्याय्यत्वात् एतेन इदानीन्तनम्लेच्छराजखानितस्थजलस्य यन्त्रोद्धृतत्वेन शुद्धताकीर्त्तनं साहसमेव तस्य म्लेच्छखानितजलत्वेन स्वभावतोऽपेयत्वात् जलान्तरस्य गङ्गाजलस्य च सन्निकृष्टत्वादापद्विषयत्वाभावात् प्रकृतिस्थविशेषणाच्च तस्य संस्कारविशेषेण विकारविशेषवत्त्वादेतद्वचनस्यापि तत्राप्रवृत्तेश्च। किञ्च "विचित्सा तु हृदये यस्मिन्नन्ने प्रजायते सहृल्लेखन्तु विज्ञेयं पुरीषन्तत् स्वभावतः" इति ब्रह्मपुराणेन अमेध्यस्पर्शवत्त्वेन शङ्कितान्नादेर्भोजननिषेधात् म्लेच्छामेध्यादिस्पर्शवत्त्वेन शङ्कितस्यास्य जलादेरप्यपेयतेति गम्यते। शशिसूर्य्यकिरणास्पृष्टतया च तस्य व्यापन्नजलतया वैद्यकोक्तदोषाधायकत्वेनापि ऽपेयता। "अपि चण्डालभाण्डस्थं तज्जलं पावनं महत्" इत्युक्तेस्तत्खाते गङ्गाजलानामेवाहृतत्वात्तस्य स्वभावतः शुद्धतेति तु न शङ्क्यं "सर्व्वत्र पावनी गङ्गा त्रिषु स्थानेषु दुष्यति म्लेच्छस्पर्शे सुराभाण्डे मेघादिजलमिश्रणे" इति वचनात् तस्य मेघादिजलसम्पर्कशङ्कायाम्लेच्छादिस्पर्शस्य प्रत्यक्षदर्शनाच्च स्वभावतः शुद्धत्वाभावात्। धारायां प्रतिप्रसवमाह बौधायनः "अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः। आकराः शुचयः सर्वे वर्ज्जयित्वा सुराकरमिति" "काले नवोदकं शुद्धं न पातव्यन्तु तत्त्र्यहम्। अकाले तु दशाहं स्यात् पीत्वा नाद्यादहर्निशमिति" आ० त० स्मृतिः। "स्नानमाचमनं दानं देवतापितृतर्पणम्। शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः"। आचमननिषेधात् पानादेः सुतरां निषेधः। "ग्रहद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः। तासु स्नानादिकं वर्ज्यं वर्ज्जयित्वा सुरापगाम् इति" छन्दो० प०। "यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिरिति" मनुः यैः विप्रैः "अन्यथा हि कृतस्तेषु देवयोनिरपांपतिः। कुशाग्रेणापि कौन्तेय न स्पृष्टव्यो महोदधिरिति भा० व० प० स्पर्शनिषेधात् पाननिषेधः। "अनिर्द्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा। आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः। आरण्यानाञ्च सर्व्वेषां मृगाणां माहिषं विना। स्त्रीक्षीरञ्चैव वर्ज्यानि सर्व्वशुक्तानि चैव हि" मनुः। "गोः क्षीरमनिर्द्दशायाः सूतके अजामहिष्योश्च नित्यमपेयमौष्ट्रमैकशफञ्च स्यन्दिनीनाञ्च याश्च वत्सव्यपेताः" अङ्गि०। "वर्ज्जयेद्गोरवत्सायाः पयस्यैवान्यवत्सया। आरण्यानाञ्च सर्व्वेषां वर्ज्जयित्वा तु माहिषमिति" यमः। "सर्वासां द्विस्तनीनां क्षीरं वर्ज्यमजावर्ज्जमिति" शङ्खः "गोजामहिषीवर्ज्जं